Lalitha Trishati Stotram

श्रीललितात्रिशतीस्तोत्ररत्नम्

NityaPaath
nityapaath.com/lalitha-trishati/

STOTRA · स्तोत्रम्

1 ककाररूपा कल्याणी कल्याणगुणशालिनी।
कल्याणशैलनिलया कमनीया कलावती॥

2 कमलाक्षी कल्मषघ्नी करुणामृतसागरा।
कदम्बकाननावासा कदम्बकुसुमप्रिया॥

3 कन्दर्पविद्या कन्दर्पजनकापाङ्गवीक्षणा।
कर्पूरवीटीसौरभ्यकल्लोलितककुप्तटा॥

4 कलिदोषहरा कञ्जलोचना कम्रविग्रहा।
कर्मादिसाक्षिणी कारयित्री कर्मफलप्रदा॥

5 एकाररूपा चैकाक्षर्येकानेकाक्षराकृतिः।
एतत्तदित्यनिर्देश्या चैकानन्दचिदाकृतिः॥

6 एवमित्यागमाबोध्या चैकभक्तिमदर्चिता।
एकाग्रचित्तनिर्ध्याता चैषणारहितादृता॥

7 एलासुगन्धिचिकुरा चैनःकूटविनाशिनी।
एकभोगा चैकरसा चैकैश्वर्यप्रदायिनी॥

8 एकातपत्रसाम्राज्यप्रदा चैकान्तपूजिता।
एधमानप्रभा चैजदनेजज्जगदीश्वरी॥

9 एकवीरादिसंसेव्या चैकप्राभवशालिनी।
ईकाररूपा चेशित्री चेप्सितार्थप्रदायिनी॥

10 ईदृगित्यविनिर्देश्या चेश्वरत्वविधायिनी।
ईशानादिब्रह्ममयी चेशित्वाद्यष्टसिद्धिदा॥

11 ईक्षित्री क्षणसृष्टाण्डकोटिरीश्वरवल्लभा।
ईडिता चेश्वरार्धाङ्गशरीरेशाधिदेवता॥

12 ईश्वरप्रेरणकरी चेशताण्डवसाक्षिणी।
ईश्वरोत्सङ्गनिलया चेतिबाधाविनाशिनी॥

13 ईहाविरहिता चेशशक्तिरीषत्स्मिताननना।
लकाररूपा ललिता लक्ष्मीवाणीनिषेविता॥

14 लाकिनी ललनारूपा लसद्दाडिमपाटला।
ललन्तिका लसत्फाला ललाटनयनार्चिता॥

15 लक्षणोज्ज्वलदिव्याङ्गी लक्षकोट्यण्डनायिका।
लक्ष्यार्था लक्षणागम्या लब्धकामा लतातनुः॥

16 ललामराजदलिकालम्बिमुक्तालताञ्चिता।
लम्बोदरप्रसूर्लभ्या लज्जाढ्या लयवर्जिता॥

17 ह्रीङ्काररूपा ह्रीङ्कारनिलया ह्रींपदप्रिया।
ह्रीङ्कारबीजा ह्रीङ्कारमन्त्रा ह्रीङ्कारलक्षणा॥

18 ह्रीङ्कारजपसुप्रीता ह्रींमति ह्रींविभूषणा।
ह्रींशीला ह्रींपदाराध्या ह्रींगर्भा ह्रींपदाभिधा॥

19 ह्रीङ्कारवाच्या ह्रीङ्कारपूज्या ह्रीङ्कारपीठिका।
ह्रीङ्कारवेद्या ह्रीङ्कारचिन्त्या ह्रीं ह्रींशरीरिणी॥

20 हकाररूपा हलधृत्पूजिता हरिणेक्षणा।
हरप्रिया हराराध्या हरिब्रह्मेन्द्रबन्दिता॥

21 हयारूढासेविताङ्घ्रिर्हयमेधसमर्चिता।
हर्यक्षवाहना हंसवाहना हतदानवा॥

22 हत्यादिपापशमनी हरिदश्वादिसेविता।
हस्तिकुम्भोत्तुङ्गकुचा हस्तिकृत्तिप्रियाङ्गना॥

23 हरिद्राकुङ्कुमादिग्धा हर्यश्वाद्यमरार्चिता।
हरिकेशसखी हादिविद्या हालामदालसा॥

24 सकाररूपा सर्वज्ञा सर्वेशी सर्वमङ्गला।
सर्वकर्त्री सर्वभर्त्री सर्वहन्त्री सनातनी॥

25 सर्वानवद्या सर्वाङ्गसुन्दरी सर्वसाक्षिणी।
सर्वात्मिका सर्वसौख्यदात्री सर्वविमोहिनी॥

26 सर्वाधारा सर्वगता सर्वावगुणवर्जिता।
सर्वारुणा सर्वमाता सर्वाभरणभूषिता॥

27 ककारार्था कालहन्त्री कामेशी कामितार्थदा।
कामसञ्जीवनी कल्या कठिनस्तनमण्डला॥

28 करभोरूः कलानाथमुखी कचजिताम्बुदा।
कटाक्षस्यन्दिकरुणा कपालिप्राणनायिका॥

29 कारुण्यविग्रहा कान्ता कान्तिधूतजपावलिः।
कलालापा कम्बुकण्ठी करनिर्जितपल्लवा॥

30 कल्पवल्लीसमभुजा कस्तूरीतिलकाञ्चिता।
हकारार्था हंसगतिर्हाटकाभरणोज्ज्वला॥

31 हारहारिकुचाभोगा हाकिनी हल्यवर्जिता।
हरित्पतिसमाराध्या हठात्कारहतासुरा॥

32 हर्षप्रदा हविर्भोक्त्री हार्दसन्तमसापहा।
हल्लीशलास्यसन्तुष्टा हंसमन्त्रार्थरूपिणी॥

33 हानोपादाननिर्मुक्ता हर्षिणी हरिसोदरी।
हाहाहूहूमुखस्तुत्या हानिवृद्धिविवर्जिता॥

34 हैयङ्गवीनहृदया हरिगोपारुणांशुका।
लकाराख्या लतापूज्या लयस्थित्युद्भवेश्वरी॥

35 लास्यदर्शनसन्तुष्टा लाभालाभविवर्जिता।
लङ्घ्येतराज्ञा लावण्यशालिनी लघुसिद्धिदा॥

36 लाक्षारससवर्णाभा लक्ष्मणाग्रजपूजिता।
लभ्येतरा लब्धभक्तिसुलभा लाङ्गलायुधा॥

37 लग्नचामरहस्तश्रीशारदापरिवीजिता।
लज्जापदसमाराध्या लम्पटा लकुलेश्वरी॥

38 लब्धमाना लब्धरसा लब्धसम्पत्समुन्नतिः।
ह्रीङ्कारिणी च ह्रीङ्कारी ह्रींमध्या ह्रींशिखामणिः॥

39 ह्रीङ्कारकुण्डाग्निशिखा ह्रीङ्कारशशिचन्द्रिका।
ह्रीङ्कारभास्कररुचिः ह्रीङ्काराम्भोदचञ्चला॥

40 ह्रीङ्कारकन्दांकुरिका ह्रीङ्कारैकपरायणा।
ह्रीङ्कारदीर्घिका हंसी ह्रीङ्कारोद्यानकेकिनी॥

41 ह्रीङ्कारारण्यहरिणी ह्रीङ्कारावालवल्लरी।
ह्रीङ्कारपञ्जरशुकी ह्रीङ्कारांगणदीपिका॥

42 ह्रीङ्कारकन्दरासिंही ह्रीङ्काराम्भोजभृङ्गिका।
ह्रीङ्कारसुमनोमाध्वी ह्रीङ्कारतरुमञ्जरी॥

43 सकाराख्या समरसा सकलागमसंस्तुता।
सर्ववेदांततात्पर्यभूमिस्सदसदाश्रया॥

44 सकला सच्चिदानन्दा साध्वी सद्गतिदायिनी।
सनकादिमुनिध्येया सदाशिवकुटुम्बिनी॥

45 सकलाधिष्ठानरूपा सत्त्वरूपा समाकृतिः।
सर्वप्रपञ्चनिर्मात्री समानाधिकवर्जिता॥

46 सर्वोत्तुङ्गा सङ्गहीना सगुणा सकलेष्टदा।
ककारिणी काव्यलोला कामेश्वरमनोहरा॥

47 कामेश्वरप्राणनाडी कामेशोत्सङ्गवासिनी।
कामेश्वरालिङ्गिताङ्गी कामेश्वरसुखप्रदा॥

48 कामेश्वरप्रणयिनी कामेश्वरविलासिनी।
कामेश्वरतपस्सिद्धिः कामेश्वरमनःप्रिया॥

49 कामेश्वरप्राणनाथा कामेश्वरविमोहिनी।
कामेश्वरब्रह्मविद्या कामेश्वरगृहेश्वरी॥

50 कामेश्वराह्लादकरी कामेश्वरमहेश्वरी।
कामेश्वरी कामकोटिनिलया कांक्षितार्थदा॥

51 लकारिणी लब्धरूपा लब्धधीर्लब्धवाञ्छिता।
लब्धपापमनोदूरा लब्धाहङ्कारदुर्गमा॥

52 लब्धशक्तिर्लब्धदेहा लब्धैश्वर्यसमुन्नतिः।
लब्धवृद्धिर्लब्धलीला लब्धयौवनशालिनी॥

53 लब्धातिशयसर्वाङ्गसौन्दर्या लब्धविभ्रमा।
लब्धरागा लब्धपतिर्लब्धनानागमस्थितिः॥

54 लब्धभोगा लब्धसुखा लब्धहर्षाभिपूरिता।
ह्रीङ्कारमूर्तिर्ह्रीङ्कारसौधशृङ्गकपोतिका॥

55 ह्रीङ्कारदुग्धाब्धिसुधा ह्रीङ्कारकमलेन्दिरा।
ह्रीङ्कारमणिदीपार्चिर्ह्रीङ्कारतरुशारिका॥

56 ह्रींकारपेटकमणिर्ह्रीङ्कारादर्शबिम्बिता।
ह्रीङ्कारकोशासिलता ह्रीङ्कारास्थाननर्तकी॥

57 ह्रीङ्कारशुक्तिकामुक्तामणिर्ह्रीङ्कारबोधिता।
ह्रीङ्कारमयसौवर्णस्तम्भविद्रुमपुत्रिका॥

58 ह्रीङ्कारवेदोपनिषद्ह्रीङ्काराध्वरदक्षिणा।
ह्रीङ्कारनन्दनारामनवकल्पकवल्लरी॥

59 ह्रीङ्कारहिमवद्गङ्गा ह्रीङ्कारार्णवकौस्तुभा।
ह्रीङ्कारमन्त्रसर्वस्वा ह्रीङ्कारपरसौख्यदा॥

Text checked against: Gita Press, Gorakhpur: Shri Lalita Sahasranama Stotra (code 1623, 7th reprint Samvat 2066), which also prints the Shri Lalita Trishati Stotraratnam and its namavali. Meanings, audio and all scripts at nityapaath.com/lalitha-trishati/